ગુજરાત શૈક્ષણિક સંશોધન અને તાલીમ પરિષદ, ગાંધીનગરના પત્ર-ક્રમાંક
જીસીઈઆરટી / અભ્યાસક્રમ / 2013 / 20335 તા. 10-03-2013 થી મંજુર

**A separate edition has been prepared for the use of teachers and guardians. Do use it.**

# Sanskrit

## Standard 8

## (Semester II)

### प्रतिज्ञापत्रम्

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां च कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**Price : ₹ 13.00**

**Production**
Gujarat Council of Educational Research and Training
Gandhinagar

**Printing**
Gujarat State Branch Text-book Board
Gandhinagar

© Gujarat State Board of School Textbooks, Gandhinagar
Copyright of this book is reserved by Gujarat State Board of School Textbooks.
No reproduction of this book, in part or in whole, in any form is permitted without the written permission of the Director, Gujarat State Board of School Textbooks.

**Production-Co-ordination**

Dr. T. S. Joshi

Haresh Chaudhari

Iqbal Vora

Chandresh Pallia

**Convener**

Narendra Raval

**Writing-Editing**

Nerendra Raval

Kanubhai Karkar

Ruta Parmar

Pareshaben Thakar

**Translater**

Dr. Ramchandbhai G. Prajapati

Rohit J. Khamar

**Reviewers**

Pravinchandra Jani, Shailesh Pandya

Ami Joshi, Harsha Mehta

Kalpeshkumar Patel, Vishnuprasad Suthar

**Artist**

Manilal Rajput, Bipinchandra Patel

Rasikbhai Vaghela, Ashok Patel

**Title Designer**

Dharmesh Chavda

**Printing Planning**

Haresh S. Limbachiya

(Dy. Director : Production)

## PREFACE

The Curriculum Framework (NCF)2005 and the Right to Education Act (RTE) 2009 recommend connecting of knowledge provided in school to the life outside the school.This principle marks a departure from the legacy of book learning and continue to shape our education system and removes a huge gap between the school, home and community.

The syllabi and textbook developed on the basis of above principle signify an attempt to implement it with a considerable change in the textbooks, teaching learning methods, approaches etc. Such textbook will provide the scope to the students to learn individually, in pairs in groups, as a whole class and provides self-learning, In improves the application and consolidation abilities of the children. In such a scenario, the teacher will just be an initiator, facilitator, motivator or guide and will create learner centred classes.

During the process of designing and developing the textbooks, the core group personnel coordinators, writers and reviewers got a lot of inspiration and motivation from the Principal secretary of Elementary Education.

Besides the guidance from IGNUS-erg and co-operation of UNICEF was easily and continuously available to the group during the entire process of developing the textbooks. After implementing the textbooks as a part of the pilot study, due efforts were made to make it error free Now, it is in the hands of the users and beneficiaries.

GCERT welcomes constructive and creative comments and suggestions which will be useful to undertake further revision and refinement.

**M. T. Shah**
**Director**
**GCERT, Gandhinagar**
**Date : 7-8-2013**

**H. K. Patel** GAS
**Director**
**Gujarat State Textbook Board**
**Gandhinagar**

First Edition : 2013

**Published by :** H. K. Patel, Director, on behalf of Gujarat State Board of School Textbooks, 'Vidyayan', Sector 10-A, Gandhinagar

**Printed by :**

# FUNDAMENTAL DUTIES

It shall be the duty of every citizen of India :*

(a) To abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

(b) To cherish and follow the noble ideals which inspired our national struggle for freedom;

(c) To uphold and protect the sovereignty, unity and integrity of India;

(d) To defend the country and render national service when called upon to do so;

(e) To promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

(f) To value and preserve the rich heritage of our composite culture;

(g) To protect and improve the natural environment including forests, lakes, rivers and wild life, and to have compassion for living creatures;

(h) To develop the scientific temper, humanism and the spirit of inquiry and reform;

(i) To safeguard public property and to abjure violence;

(j) To strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement.

* Constitution of India : Section 51-A

# INDEX


| Sr. No | Name of the chapters | Page No. |
|---|---|---|
| 1. | पुत्री मम खलु निद्राति। | 1 |
| 2. | खेलमहोत्सवः | 5 |
| 3. | प्रहेलिकाः | 8 |
| 4. | प्रेरणादीपः चाणक्यः | 11 |
| 5. | प्रभातवर्णनम् | 14 |
| • | पुनरावर्तनम् - 1 | 18 |
| 6. | रमणीया नगरी | 20 |
| 7. | सुभाषितानि | 24 |
| 8. | मनुष्यसिंहयोः मैत्री | 27 |
| • | पुनरावर्तनम् - 2 | 30 |
| • | भाषासज्जता | 32 |

# 1 पुत्री मम खलु निद्राति

पुत्री मम खलु निद्राति
पुत्री मम खलु निद्राति।
सुन्दरशयने सुखमयवसने
पुत्री मम खलु निद्राति॥





रे रे वायस कर्कशकण्ठ !
मा रट मा रट कर्णकठोरम्।
श्रान्ता क्लान्ता पुनरनुनीता
पुत्री मम खलु निद्राति॥ १॥

म्याँव् म्याँव् मा कुरु घोरविरावं
चल चल रे खल चोर बिडाल।
स्निग्धा मुग्धा सेवितदुग्धा
पुत्री मम खलु निद्राति॥ २॥



उच्चैर्मा भष शुनकवराक
भौ भौ मा कुरु कार्यविहीन।
विमला कुशला सुमनोमृदुला
पुत्री मम खलु निद्राति॥ ३॥





रे रे मशक मा कुरु गानं
मा स्पृश मा दश रक्तपिपासो !
सुदती सुमुखी शोभनगात्री
पुत्री मम खलु निद्राति॥ ४॥

-विश्वासः

## Glossary

**निद्राति** is sleeping **सुखमयवसने** in light clothes **वायसः** crow **मा** no **श्रान्ता** tired **क्लान्ता** withered **अनुतीता** pleased **घोरविराव** loud noise **खल** cunning **स्निग्धा** gentle **शुनकवराक** puppy **कुरु** do **विमला** neat and clean **मशकः** mosquito **सुदती** having good teeth **शोभनगात्री** having good limbs

## Exercise

### 1. Pronounce the following words correctly.

निद्राति, श्रान्ता, क्लान्ता, स्निग्धा, मुग्धा, उच्चैः, मृदुला, स्पृश, शोभनगात्री।

### 2. Answer the following questions :

(1) पुत्री किं करोति ?

(2) कर्कशः कण्ठः कस्य अस्ति ?

(3) बिडालः किं करोति ?

(4) भौ भौ कः वदति ?

(5) माता मशकाय किं कथयति ?

### 3. Match the following appropriately :

| अ | | ब |
|---|---|---|
| (1) वायसः | ☐ | (1) निद्राति |
| (2) बिडालः | ☐ | (2) कर्कशकण्ठः |
| (3) शुनकवराकः | ☐ | (3) म्याँव् म्याँव् |
| (4) पुत्री | ☐ | (4) भौ भौ |

### 4. Rewrite the following lines of the poem in good hand writing :

(1) सुन्दरशयने सुखमयवसने।

(2) उच्चैर्मा भष शुनकवराक।

(3) मा स्पृश मा दश रक्तपिपासो।

(4) सुदती सुमुखी शोभनगात्री।

**Activity :**

- Make a list of the different animals and birds and their sounds with the help of your teacher.
- Collect the local lullabies and hold a competition of singing them.
- Get the songs like 'Hato Hu suto parne, Khamma Virane jaun Varne' (a Gujarati song) and sing them.

## ज्ञातव्यम्

| | | | | | |
|---|---|---|---|---|---|
| कुक्कुटः | : | cock | गोपतिः | : | bull |
| कौशिकः | : | owl | गण्डकः | : | rhino |
| गृध्रः | : | eagle | चित्रकायः | : | leopard |
| टिट्टिभः | : | lapwing | महिषः | : | he buffalo |
| तित्तिरः | : | partridge (a kind of bird) | मेषः | : | sheep |
| सारिका | : | Indian jay | वराह : | : | pig |
| चक्रवाकः | : | Greek partridge (a kind of bird) | वृकः | : | wolf |
| बकः | : | crane | हरिणः | : | deer |
| श्येनः | : | hawk | भल्लूकः | : | bear |

# 2 खेलमहोत्सवः




विवेकानन्दस्य विद्यालये खेलमहोत्सवः प्रचलति। बालकाः प्रसन्नाः सन्ति। सर्वे कौशलस्य प्रदर्शनं कर्तुम् इच्छन्ति। कुत्रचित् धावनस्पर्धा चलति। बालकाः प्रयत्नपूर्वकं शीघ्रतया धावन्ति। कतिपयबालकाः उच्चैः वदन्ति 'धावतु धावतु त्वरितं धावतु।'

कुत्रचित् गोलक्षेपकस्पर्धा चलति। क्रमशः क्रीडकः लोहगोलकं क्षिपति।

कुत्रचित् कबड्डी चलति। कुत्रचित् क्रीडकः दीर्घलङ्घनं करोति। सम्यक्तया सर्वाः स्पर्धाः पूर्णाः भवन्ति।

समापनकार्यक्रमस्य प्रारम्भः भवति। विद्यालयस्य आचार्यः स्व-स्थानतः उत्तिष्ठति वदति च "खेल महोत्सवे आगतानां प्रतिभागिनानां कृते अभिनन्दनम्। एषः अस्माकं प्रथमः खेलमहोत्सवः। अस्माकं शालायाम् अस्मिन् वर्षे नूतनः शिक्षकः नियुक्तः अस्ति। एतत् सर्वं तस्य प्रयासस्य फलम्। तमपि अभिनन्दनम्। अधुना अस्माकं विद्यालये व्यायामस्य प्रशिक्षणार्थं प्रशिक्षकः अपि अस्ति। सः प्रशिक्षणं दास्यति। अद्यारभ्य अस्माकं शालायां प्रतिवर्षं खेलमहोत्सवः भविष्यति। अस्माकं छात्राः राज्यकक्षायाः राष्ट्रकक्षायाः च खेलमहोत्सवेषु भागं ग्रहीष्यन्ति। अस्माकं शालायाः नाम उज्ज्वलं भविष्यति। जीवने खेलस्य महत्त्वम् अस्ति। खेल सर्वांगिणविकासार्थं साहाय्यं करोति।

## Glossary

**चलति** – is going on **प्रसन्नाः** – pleased **कौशलस्य** – of the skill **धावनस्पर्धा** – race **शीघ्रतया/त्वरितम्** – fast **धावन्ति** – are running **कतिपय** – some **उच्चैः** – loudly **धावतु** – run **गोलक्षेपकस्पर्धा** – shout-put **लोहगोलकम्** – iron-ball **दीर्घलङ्घनम्** – long jump **सम्यक्तया** – well **प्रारम्भः** – beginning **स्व-स्थानतः** – from one's seat/place **आगतानाम्** – of those who have come **प्रतिभागिनानाम्** – of the participants **कृते** – for (someone) **ग्रहीष्यन्ति** – will participate **उज्ज्वलम्** – bright

## Exercise

**1. Frame sentences following the illustration :**

**Illustration :** धावकः शीघ्रं धावति। – धावकाः शीघ्रं धावन्ति।

(1) मानवः क्रीडां पश्यति।

(2) गजः मन्दं चलति।

(3) बालकः शीघ्रं गच्छति।

(4) महिला श्लोकं गायति।

**2. Answer the following questions :**

(1) विवेकानन्दस्य विद्यालये किं चलति ?

(2) धावकाः किं कुर्वन्ति ?

(3) विद्यालये काः काः क्रीडाः चलन्ति ?

(4) जीवने कस्य महत्त्वम् अस्ति ?

(5) खेलः कस्यार्थे साहाय्यं करोति ?

**3. Transform sentences following the illustration :**

**Illustration :** राधा आगच्छति। राधा आगमिष्यति।

(1) शबाना वदति। ____________________।

(2) मोहसीना चलति। ____________________।

(3) रमेशः खादति। ____________________।

(4) वेदः कथयति। ____________________।



**4.**

- **Colour the above picture and frame sentences based on it :**

(1) ____________________

(2) ____________________

(3) ____________________

(4) ____________________

(5) ____________________

**5. Pronounce the following words correctly about the game.**

(1) शीघ्रतया (2) त्वरितम् (3) कुत्रचित् (4) गोलक्षेपः (5) दीर्घलङ्घनम् (6) अद्यारभ्य (7) प्रशिक्षणम्

**Activity**

- Make a list of games that you play in the street with your friends :

# 3 प्रहेलिका:

एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥ १॥
चतुर्मुखो न च ब्रह्मा वृषारूढो न शङ्करः।
निर्जीवी च निराहारी अजस्रं धान्यभक्षणम्॥ २॥
अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥ ३॥
पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः।
चलति वायुवेगेन पदमेकं न गच्छति॥ ४॥
सुवर्णस्य सुवर्णस्य सुवर्णस्य च जानकि।
प्रेषिता तव रामेण सुवर्णस्य च मुद्रिका॥ ५॥
भोजनान्ते च किं पेयं जयन्तः कस्य वै सुतः।
कथं विष्णुपदं प्रोक्तं तक्रं शक्रस्य दुर्लभम्॥ ६॥

## Glossary

**चक्षुः** eye **काकः** crow **बिलम्** hole **पन्नगः** snake **क्षीयते** is being destroyed **वर्धते** increases **चतुर्मुखः** having four-faced **अजस्रम्** constant **वृषः** ox **तिष्ठति** is standing **मुद्रिका** ring **पेयम्** can be drunk **सुतः** son **प्रोक्तम्** said **अपदः** without legs **तक्रम्** butter milk **शक्रः** Indra **याति** goes/is going

## Sandhi

**चक्षुर्न -चक्षुः न, कोकोऽयम्- काकः अयम्, बिलमिच्छन्न - बिलम् इच्छन् न, चैव - च एव, समुद्रो न - समुद्रः न**

## Exercise

**1. Pronounce the following words correctly :**

(1) काकोऽयम् (2) पन्नगः (3) अजस्रम् (4) स्फुटवक्ता (5) पर्वताग्रे (6) भोजनान्ते

**2. Answer the following questions :**

(1) एकचक्षुः कः अस्ति ?

(2) कः धान्यभक्षणं करोति ?

(3) सारथिः कुत्र तिष्ठति ?

(4) रथः कुत्र याति ?

(5) रामेण का प्रेषिता ?

(6) जयन्तः कस्य पुत्रः ?

**3. Fill in the blanks selecting appropriate word from the brackets :**

(1) चतुर्मुखः ____________ अस्ति। (ब्रह्मा, विष्णुः, शङ्करः)

(2) भोजनान्ते पेयम् ____________ । (दुग्धम्, सुपम्, तक्रम्)

(3) अपदः शब्दस्य अर्थः ____________ । (सपादः, पादरहितः, पादः)

(4) रथः ____________ चलति। (वायुवेगेन, जलवेगेन, विद्युत्वेगेन)

(5) विष्णुपदं ____________ प्रोक्तम्। (सुलभम्, उन्नतम्, दुर्लभम्)

**4. Write the following shlokas in good handwriting :**

(1) भोजनान्ते ____________________________ दुर्लभम्॥

(2) अपदो दूरगामी ____________________________ पण्डितः॥

**5. Translate the following English words into Sanskrit :**

(1) after dinner (2) without mouth (3) one step (4) ring (5) one who is going away (6) one who rides a bullock

**6. Here are some conjuncts/compounds used in the unit. Form other words like them :**

(1) From वृष–वृषारुढः। In the same way -

अश्व ____________ गज ____________ वृक्ष ____________

(2) From पदम्–पदमेकम्। In the same way -

शब्दम् ____________ वाक्यम् ____________ गीतम् ____________

(3) From भोजन–भोजनान्ते। In the same way -

दिन ____________ निशा ____________ वर्षा ____________

(4) From पर्वतः–पर्वताग्रे। In the same way -

रथ ____________ वृक्ष ____________ कर ____________

**Activity :**

- Find out a few prahelikas spoken in your native and write them.
- Get the good slogans/thoughts helping us to be healthy and make a collection.

Illustration : (1) अजीर्णे भोजनं विषम्।

(2) आँखे त्रिफला, दांते लूण। पेट न भरीए चारे खूण।।

# 4 प्रेरणादीपः चाणक्यः



**चन्द्रगुप्तः** : आर्य चाणक्य! शीतकालः अस्ति। जनेषुः कम्बलान् वितरतु।

**चाणक्यः** : महाराज! इदानीम् अहं कम्बलान् मम गृहं नयामि। प्रभाते वितरिष्यामि।

**चन्द्रगुप्तः** : तथा करोतु भवान्।

(त्रयः चौराः प्रविशन्ति।)

**प्रथमः** : चन्द्रगुप्तस्य मन्त्री चाणक्यः। एतत् तस्य गृहम्।

**द्वितीयः** : अत्र तैलदीपः। समीपे पीठम्। पुस्तकानि...।

**तृतीयः** : धनं कुत्र ?

**प्रथमः** : अत्र तु नास्ति। द्वितीयं प्रकोष्ठं प्रविशामः।

**द्वितीयः** : आश्चर्यम्! शैत्यम् अधिकम् अस्ति...।

**तृतीयः** : कम्बलाः समीपे एव सन्ति...।

**प्रथमः** : तथापि एषः महाशयः।

**द्वितीयः** : स्वयं कम्बलस्य उपयोगं न करोति।

**तृतीयः** : पुनश्च अधः शयनं करोति। आश्चर्यम्!

**प्रथमः** : तर्हि चाणक्यं पृच्छामः। ज्ञातव्यं तस्य रहस्यम्।

**द्वितीयः** : एतत् अस्माकं साहसम्!!

**प्रथमः** : आर्य! वयं चौराः स्मः। चौरकार्याय आगताः। महोदय! आश्चर्यम् अस्ति।

**द्वितीयः** : शैत्यम् अस्ति। कम्बलाः समीपे सन्ति। तथापि भवान् किमर्थम् उपयोगं न करोति ?

**चाणक्यः** : एते कम्बलाः मम कृते न, दरिद्रजनानां कृते सन्ति। यत् वस्तु अस्माकं नास्ति, तस्य उपयोगः पापम्।

**सर्वे चौराः** : अरे रे! वयं तु प्रतिदिनं पापं कुर्मः। चौरकार्येण एव उदरपूर्तिं कुर्मः। वयम् अद्य आरभ्य पापं न करिष्यामः। जयतु आर्यः।

## टिप्पणी

**शीतकालः** Time of chill winter **जनेभ्यः** to the people and for the people **इदानीम्** now **नयामि** am taking/carrying **प्रकोष्ठम्** room **अधः** under **अद्य** today **ज्ञातव्यम्** should know **कुर्मः** are doing

## Exercise

### 1. Pronounce the following words correctly.

(1) कम्बलान् (2) चन्द्रगुप्तस्य (3) तैलदीपः (4) प्रकोष्ठम् (5) शैत्यम् (6) पुनश्च (7) आश्चर्यम्

### 2. Answer the following questions :

(1) चन्द्रगुप्तः चाणक्यं किम् अवदत् ?

(2) चाणक्यः कम्बलान् कुत्र नयति ?

(3) चाणक्यस्य गृहे के प्रविशन्ति ?

(4) चाणक्यः किमर्थं कम्बलस्य उपयोगं न करोति ?

### 3. Follow the example and frame sentences using the words from the brackets :

**Illustration :** सुरेशः पुस्तकम् – सुरेशस्य पुस्तकम् अस्ति।

(1) ____________________। (महेशः, लेखनी)

(2) ____________________। (राजेशः, सुधाखण्डः)

(3) ____________________। (शैलेषः, धनम्)

(4) ____________________। (मूकेशः, फलम्)

(5) ____________________। (मनीषः, उपनेत्रम्)

**4. Follow the example given below and frame other sentences :**

**Illustration :** अहं प्रविशामि। वयं प्रविशामः।

अहं खादामि। __________________________ ।

अहं गच्छामि। __________________________ ।

अहं पश्यामि। __________________________ ।

अहं पृच्छामि। __________________________ ।

अहं पठामि। __________________________ ।

**5. Follow the example and frame other sentences using the words from the brackets :**

**Illustration :** जनेषुः कम्बलान् वितरतु।

(1) __________________________ । (शिक्षकः, सुधाखण्डः)

(2) __________________________ । (छात्रः, प्रसादः)

(3) __________________________ । (बालकः, मोदकः)

(4) __________________________ । (मानवः, दीपः)

**Activity**

- Get the biography of Chanakya from the library and read it.
- Collect the inspiring events of great persons.
- Get the details of the renounce lay-men and honest who live life with minimum needs.

# 5 प्रभातवर्णनम्



चन्द्रः अस्तं गच्छति
सूर्यः उदयं गच्छति।
परितो भवति प्रकाशः
मन्दं चलति समीरः
मधुपो भवति सधीरः॥



कलिकावृन्दं विकसति
लतिकावृन्दं विलसति।
निद्रा तन्द्रा भग्ना
जनता कर्मणि लग्ना
सकले नव उल्लासः
वदने वदने हासः॥



पथि पथि जनसञ्चारः
नूपुर-रव-झङ्कारः
विटपे खगकुलरवः
चरितुं चलिता गावः॥

हस्ते हस्ते पत्रम्
वदने वदने स्तोत्रम्
खेलति बालकवृन्दं
गीतं गायं गायम् ॥

– वासुदेव द्विवेदी शास्त्री



## Glossary

**परितः** in all directions **समीरः** wind **मधुपः** - wasp/hornet **सधीरः** patient **तन्द्रा** sleepiness **भग्ना** broken **हासः** smile **रवः** noise **खगः** bird **विटपे** on the branch **गावः** cows **लग्ना** is busy **पथि** on the way

## Exercise

**1. Pronounce the following words correctly :**

चन्द्रः, प्रकाशः, वृन्दम्, लतिकावृन्दम्, निद्रा, तन्द्रा, भग्ना, लग्ना, उल्लासः, हासः, जनसञ्चारः, झङ्कारः।

**2. Answer the following questions selecting the correct options given below them :**

(1) सूर्योदयः कदा भवति ?

(क) सूर्योदयः सायंकाले भवति।

(ख) सूर्योदयः प्रभाते भवति।

(ग) सूर्योदयः मध्याह्ने भवति।

(2) सूर्योदयस्य अनन्तरं जनाः किं कुर्वन्ति ?

(क) सूर्योदयस्य अनन्तरं जनाः कर्मणि लग्नाः भवन्ति।

(ख) सूर्योदयस्य अनन्तरं जनाः वार्तालापमग्नाः भवन्ति।

(ग) सूर्योदयस्य अनन्तरं जनाः निद्रामग्नाः भवन्ति।

(3) प्रभातकाले वदने वदने किम् अस्ति ?

(क) वदने वदने चिन्ता अस्ति।

(ख) वदने वदने रुदनम् अस्ति।

(ग) वदने वदने हासः अस्ति।

(4) बालकवृन्दं प्रभातकाले किं करोति ?

(क) बालकवृन्दं प्रभातकाले खेलति।

(ख) बालकवृन्दं प्रभातकाले शयनं करोति।

(ग) बालकवृन्दं प्रभातकाले पूजां करोति।

**3. Follow the example and frame sentences using the words from the brackets :**

(अश्वः, गजः, शशकः, महिषः)

**Illustration :** मन्दं चलति समीरः।

(1) शीघ्रं ____________ ।

(2) मन्दं ____________ ।

(3) शीघ्रं ____________ ।

(4) मन्दं ____________ ।

**4. Find out the antonym of the given words from the bracket and write them :**

(अधीरः, शीघ्रम्, जागरणम्, अस्तः)

(1) मन्दम् ____________ । (2) उदयः ____________ ।

(3) सधीरः ____________ । (4) निद्रा ____________ ।

**5. Find out the synonyms of the words from the brackets and write them :**

(सुधाकरः, दिवाकरः, भ्रमरः, अनिलः, धेनवः)

(1) समीरः ____________ ।

(2) सूर्यः ____________ ।

(3) मधुपः ____________ ।

(4) चन्द्रः ____________ ।

(5) गावः ____________ ।

**6. Write the following lines of the poem in good hand writing :**

कलिकावृन्दं विकसति। ____________________

लतिकावृन्दं विलसति। ____________________

निद्रा तन्द्रा भग्ना। ____________________

जनता कर्मणि लग्ना। ____________________

सकले नव उल्लासः। ____________________

वदने वदने हासः। ____________________

**7. Follow the example and use the word 'वृन्द' with the other words given in brackets :**

(सखी, मित्र, गायक, वादक, गोप, बाल)

**Illustration :** सखी – सखीवृन्द

### Activity

- Find out such other poems describing 'morning' from the library and try to sing with rhythm them.
- Draw the picture of a village or a city of morning and apply proper colours.
- Get the information of yourself and the people around you, about morning routine and note them :

**हसामः**

"मम शुनकः कुत्रापि अदृश्यतां गतः।"

"एवम्! तर्हि वर्तमानपत्रे विज्ञापिकां प्रकाशयतु भवान्।"

"किं तेन ? मम शुनकः पठितुं न जानाति।"

# पुनरावर्तनम् 1

**1. Frame sentences with the help of the circle :**




**2. Fill in the blanks selecting proper word from the brackets :**

(1) विवेकानन्दस्य विद्यालये ____________ चलति। (खेलमहोत्सवः, प्रवेशमहोत्सवः)

(2) चन्द्रगुप्तस्य मन्त्री ____________ अस्ति (विदुरः, चाणक्यः)

(3) पुत्री ____________ निद्राति। (सुखमयवसने, दुःखमयवसने)

(4) तक्रं ____________ दुर्लभम्। (रावणस्य, शक्रस्य)

(5) प्रभाते ____________ विकसति। (तारिकावृन्दम्, कलिकावृन्दम्)

3. **Observe the picture and read the following paragraph with correct pronunciations and understand it :**



एका पिपीलिका गच्छति। मार्गे गजः तां दृष्ट्वा कथयति – ''रे पिपीलिके ! मम मार्गतः दूरी भव अन्यथा अहं त्वां मर्दयिष्यामि।'' पिपीलिका किमपि न वदति। अनन्तरं पिपीलिका शुण्डाग्रं प्रविशति दशति च। गजः त्रस्तः भवति। सः स्वीकरोति यत् संसारे कोऽपि न तुच्छः न च उच्चः। सर्वे समानाः सन्ति।

4. **Make (✓) against the true sentences and (✕) against the false sentences :**

(1) जीवने खेलस्य महत्त्वं नास्ति। ☐
(2) चाणक्यः कम्बलान् तस्य गृहं नयति। ☐
(3) काकस्य रवः कर्णप्रियः। ☐
(4) शङ्करः चतुर्मुखः अस्ति। ☐
(5) बिडालः उच्चैः भसति। ☐

5. **Translate the following English sentences into Sanskrit :**

(1) Some children speak loudly 'Run, run... fast'.
(2) This is our enterprise.
(3) Ok, mosquito, don't sing a song.
(4) The moon is about to set.
(5) The rivers don't drink their own water.

# 6 रमणीया नगरी



गान्धीनगरं गुर्जरराज्यस्य राजधानी अस्ति। इदं सुन्दरं, सुयोजितं च नगरम् अस्ति। अत्र बहूनि दर्शनीयानि स्थानानि सन्ति। यथा सचिवालयः, महात्मामन्दिरम्, अक्षरधाममन्दिरम् एवं इन्द्रोडा पक्षि उद्यानम्।



इदं सचिवालयभवनम् अस्ति। अस्मिन् भवने विधानसभायाः अधिवेशनानि भवन्ति। अस्मिन्नेव भवने स्थित्वा राज्यस्य मन्त्रिणः, सचिवाः अन्ये च अधिकारिणः राज्यकार्यं सञ्चालयन्ति। सचिवालयः एव गुर्जरप्रदेश-शासनस्य मुख्यः कार्यालयः अस्ति।



अस्माकं राष्ट्रपितुः श्री गान्धिमहोदयस्य स्मृतिरूपेण एतस्य मन्दिरस्य निर्माणम् अभवत्। यत् 'महात्मामन्दिर नाम्ना प्रसिद्धम्अस्ति' महात्मा गान्धिमहोदयः भारतस्य स्वतन्त्रतायाः कृते भृशं प्रयत्नम् अकरोत्। एतानि सर्वाणि कार्याणि चित्ररूपैः अत्र प्रदर्शनार्थं प्रस्तुतानि सन्ति।



एतत् 'अक्षरधाम' नामकं विशालं मन्दिरम् अस्ति। मन्दिरे प्रदर्शनविभागः अतीव मनोहरः अस्ति। प्रदर्शनविभागे जनाः एकं चलचित्रम् अपि पश्यन्ति। अध्यात्मविज्ञानयोः सङ्गमः अत्र दृश्यते। अत्र चित्ताकर्षकं विशालम् उद्यानम् अपि अस्ति। प्रतिदिनं बहवः यात्रिकाः एतस्य मन्दिरस्य दर्शनार्थम् आगच्छन्ति।



गान्धीनगरस्य समीपे एव विशालं इन्द्रोडा पक्षिउद्यानम् अस्ति। एतस्मिन् स्थाने खगाः, प्राणिनः च निजपर्यावरणे एव निवसन्ति। डायनोसोर नाम्नः प्राचीनमहाकायप्राणिनः विशेषः विभागः अस्ति। एषः विभागः बालानां कृते अतीव आकर्षकः मनोरञ्जकः च अस्ति। अत्र एकं सर्पगृहम् अपि अस्ति। विविधकुलानां सर्पान् अत्र द्रष्टुं शक्नुमः।



महात्मागान्धिमन्दिरतः नातिदूरे एव विद्याभवन् नाम विशालं भवनम् अस्ति। तत् एव भवनं जी.सी.ई.आर.टी. रूपेण ख्यातम् अस्ति। विद्याभवने जी.सी.ई.आर.टी. नाम परिषदः कार्यालयः अस्ति। इयं परिषद् अस्माकं प्राथमिक शिक्षणक्षेत्रे परिवर्तनार्थं सततं प्रवृत्ता अस्ति

गान्धीनगरे विशालाः स्वच्छमार्गाः वर्तन्ते। एतस्मिन् नगरे बहूनि रमणीयानि उद्यानानि सन्ति। नगरे बहवः पादपाः सन्ति तेन कारणेन इदं नगरं विश्वस्य हरितनगरं रूपेण अपि प्रसिद्धम्।

## Glossary

**इदम्** this **बहूनि** many **अस्मिन्** in this **भृशम्** a lot of **दर्शयति** shows/is showing **निवसन्ति** lives **कुलानाम्** of families dynasties **द्रष्टुम्** to see **नातिदूरे** not far **ख्यातम्** famous

## Exercise

### 1. Pronounce the following words correctly :

गूर्जरराज्यस्य, दर्शनीयानि, इन्द्रोडा, पक्षि-उद्यानम्, अस्मिन्, स्थित्वा, सञ्चालयन्ति, स्मृतिः, स्वतन्त्रतायाः, भृशम्, प्रदर्शनार्थम्, चित्ताकर्षकम्।

### 2. Answer the following questions :

(1) गूर्जरराज्यस्य राजधानी किम् नगरम् अस्ति ?

(2) महात्मागान्धिमन्दिरतः नाति दूरे एव किम् अस्ति ?

(3) पक्षि-उद्याने किं किम् अस्ति ?

(4) अध्यात्मविज्ञानयोः सङ्गमः कुत्र दृश्यते ?

(5) स्वतन्त्रतायाः कृते कः भृशं प्रयत्नम् अकरोत् ?

### 3. Match the following 'A' and 'B' properly :

| A | | B |
|---|---|---|
| (1) गान्धिनगरम् | ☐ | (1) जी.सी.ई.आर.टी. |
| (2) अक्षरधाममन्दिरम् | ☐ | (2) अस्माकं राष्ट्रपिता |
| (3) इन्द्रोडा पक्षि-उद्यानम् | ☐ | (3) अस्माकं राष्ट्रपितुः स्मृतिः |
| (4) विद्याभवनम् | ☐ | (4) विविधकुलानां सर्पाः |
| (5) महात्मामन्दिरम् | ☐ | (5) हरितनगरम् |
| | | (6) चलचित्रं पश्यन्ति |

**4. Frame the sentences using the words from the brackets. Follow the example :**

(मन्दिरम्, पक्षिगृहम्, उद्यानम्, तडागः)

**Illustration :** मम ग्रामे विद्यालयः अस्ति।

(1) ____________________

(2) ____________________

(3) ____________________

(4) ____________________

**5. Translate the following sentences into Sanskrit :**

(1) My village is beautiful.

(2) There are many birds here.

(3) There is a garden in my village.

(4) My school is big.

(5) Gandhiji is the father of our nation.

**6. Fill in the blanks selecting the appropriate option from the brackets :**

(1) अत्र पाठशाला अस्ति। पाठशालायां __________ सन्ति। (छात्राः, खगाः)

(2) अत्र शिक्षकखण्डः अस्ति। शिक्षकखण्डे __________ सन्ति। (बालाः, शिक्षकाः)

(3) अत्र पुस्तकालयः अस्ति। पुस्तकालये __________ सन्ति। (पुस्तकानि, बालिकाः)

**7. Describe your village/town in Sanskrit in 5 to 6 sentences :**

## Activities

- Draw a map/outline of your village.
- Collect more information about the capital of Gujarat from the library.
- Get details about places of tourist interest or worth visiting around your area.

# 7 सुभाषितानि

पुस्तकेषु हि या विद्या परहस्तेषु यद् धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्॥ १ ॥
वृक्षः फलान्वितः भाति वृक्षं धूनयते कपिः
वृक्षेण वार्यते तापः जलं वृक्षाय दीयते।
वृक्षात् पतन्ति पर्णानि वृक्षस्य प्रसरो महान्
वृक्षे खगाः निकूजन्ति वृक्ष धन्योऽसि भूतले॥ २ ॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद् रिपुः।
व्यवहारेण हि जायन्ते मित्राणि रिपवस्तथा॥ ३ ॥
पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः॥ ४ ॥
गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयू महेन्द्रतनया चर्मण्वती वेदिका।
क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी
पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्वन्तु मे मङ्गलम्॥ ५ ॥
घृष्टं घृष्टं पुनरपि पुनःचन्दनं चारुगन्धं।
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुदण्डम्।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं।
न प्राणान्ते प्रकृतिविकृतिर्जायते सज्जनानाम्॥ ६ ॥

## Glossary

**परहस्तेषु** in the hands of other **भाति** looks beautiful **कार्यकाले समुत्पन्ने** when there is need **धूनयते** shakes **कपिः** monkey **वार्यते** is prevented **दीयते** is given **प्रसरः** spread **भूतले** on the earth **रिपुः** enemy **अम्भः** water **सस्यम्** grain **वारिवाहा** clouds **सताम्** of the gentlemen **घृष्टम्** rubbed **इक्षुदण्डम्** sugarcane stick **दग्धम्** burnt

| | | | | | |
|---|---|---|---|---|---|
| धन्योऽसि | – | धन्यः असि | नादन्ति | – | न अदन्ति |
| कस्यचिन्मित्रं | – | कस्यचित् मित्रम् | पुनरपि | – | पुनः अपि |
| रिपवस्तथा | – | रिपवः तथा | पुनश्चन्दनम् | – | पुनः चन्दनम् |
| स्वयमेव | – | स्वयम् एव | चैवेक्षुदण्डम् | – | च एव इक्षुदण्डम् |
| नाम्भः | – | न अम्भः | | | |

## Exercise

**1. Pronounce the following words correctly :**

समुत्पन्ने, निकूजन्ति, कस्यचिन्मित्रम्, समुद्रसहिताः, चैवेक्षुदण्डम्, काञ्चनम्

**2. Answer the following questions :**

(1) कीदृशी विद्या कार्यकाले उपयुक्ता न भवति ?

(2) कस्य विभूतयः परोपकाराय सन्ति ?

(3) वृक्षे के निकूजन्ति ?

(4) मित्राणि तथा रिपवः केन जायन्ते ?

(5) पञ्चनदीनां नामानि लिखतु।

(6) सज्जनानां किं विकृतं न भवति ?

**3. Disjoin the Sandhi/Conjunct :**

(1) धन्योऽसि

(2) कस्यचिन्मित्रम्

(3) स्वयमेव

(4) पुनरपि

**4. Join the words.**

(1) रिपवः + तथा

(2) पुनः + चन्दनम्

(3) न + अम्भः

(4) च + एव + इक्षुदण्डम्

(5) न + अदन्ति

**5. Write the following root verbs as shown in example :**

**Illustration :** पत् – पतन्ति

| | |
|---|---|
| (1) पा (पिब्) – | (5) लिख् – |
| (2) खाद् – | (6) दृश् (पश्य्) – |
| (3) गर्ज् – | (7) पठ् – |
| (4) वद् – | (8) नम् – |

**6. Fill in the blanks using the correct words from the brackets :**

(जलम्, अन्नम्, पुष्पान्, रसम्, फलानि)

(1) वारिवाहाः स्वयं ______ न खादन्ति।

(2) नद्यः स्वयं ______ न पिबन्ति।

(3) वृक्षाः स्वयं ______ न खादन्ति।

(4) पादपाः स्वयं ______ न जिघ्रन्ति।

(5) मधुमक्षिकाः स्वयं ______ न पिबन्ति।

**7. Complete the following :**

(1) पुस्तकेषु हि ______।
______ न तद् धनम्।

(2) पिबन्ति नद्यः ______।
______।
______।
______ सतां विभूतयः।

**8. Sing the Subhashit with correct pronunciations individually, in group.**

**Activity/Project-work**

- Find out Subhashitani from 'Subhashit-Ratnavali' from any other book/volume of Subhashit or from newspaper and write them.
- Collect and present the sayings or usages spoken in your area that also focus on the thoughts expressed in this Subhashitani.
- Collect the information about the local river or any other source of water.
- Divide the class into groups, collect the Subhashitani and prepare a manuscript of it.

# 8 मनुष्यसिंहयोः मैत्री



सौराष्ट्रप्रदेशे सताधारग्रामस्य समीपे मोटीमौणपरी नामकः ग्रामः वर्तते। कतिवर्षपूर्वे तस्मिन् ग्रामे मात्रावालः नामकः एकः कृषीवलः आसीत्। नद्याः तटे कृषिवाटिका आसीत्। मात्रावाला प्रतिदिनं वाटिकायां वृक्षतले स्थित्वा नद्याः जलम् अपश्यत्।



एकदा सः अपश्यत् । सिंहः स्वभार्यया सह नद्याः जलपानार्थम् आगच्छत्। नद्याः जले स्थितः मकरः सिंहभार्यायाः वधम् अकरोत्। सिंहः तस्याः रक्षणाय प्रयत्नम् अकरोत्, किन्तु निष्फलः अभवत्। दुखितः सिंहः नद्याः तटे अतिष्ठत्। चतुर्णां दिनानाम् अनन्तरं यदा मकरः नद्याः तटसमीपं आगच्छत तदा सिंहः शीघ्रतया आक्रमणम् अकरोत्। तयोः मध्ये घोरयुद्धम् अभवत। सिंहः मकरस्य वधम् अकरोत्। किन्तु सः स्वयमपि क्षतिग्रस्तः भूत्वा तत्रैव अपतत्।



मात्रावालः दूरतः एतत् अपश्यत्। सः क्षतिग्रस्तसिंहस्य सहायतार्थं तत्र अगच्छत्। औषधानि आनीय सः सिंहस्य शुश्रूषाम् अकरोत्। कति दिनानन्तरं सिंहः स्वस्थः अभवत तथा च तस्य मित्रम् अभवत। तदनन्तरं सः एव सिंहः प्रतिदिनं मात्रावालः गृहे तस्य समीपं न्यवसत्। सः मात्रावाल सह सर्वत्र भ्रमणम् अकरोत्। तस्य गृहं क्षेत्रं च अरक्षत्। मनुष्यसिंहयोः एषा अद्वितीया मैत्री कतिवर्षपर्यन्तं प्राचलत्। मात्रावालं निधनकाले दुःखितः सिंहः श्मशानयात्रायाम् अपि अगच्छत्। स्मशानतः एव सः वनम् अगच्छत्। तदनन्तरं कोऽपि जनः तं सिंहं न अपश्यत्।





अद्यापि जनाः एतस्य सत्यप्रसङ्गस्य विस्मरणं कर्तुं न शक्नुवन्ति।

## Glossary

**कतिवर्ष** some years **कृषिवाटिका** farm **स्थितः** existing **सिंहभार्या** the wife of the lion/lioness **क्षतिग्रस्तः** injured **भूत्वा** bing **अपतत्** fell **आनीय** having brought **शुश्रूषाम्** service, treatment **निधनकाले** at the time of death

## Exercise

**1. Pronounce the following wrods correctly and copy them :**

सौराष्ट्रप्रदेशे, मात्रावालः, कृषिवाटिका, क्षतिग्रस्तः, शुश्रूषाम्, मनुष्यसिंहयोः, सत्यप्रसङ्गस्य, सहायतार्थम्

**2. Answer the questions based on the lesson and write them :**

(1) मात्रावालः ग्रामस्य नामः किम् ?

(2) नद्याः तटे कस्य कृषिवाटिका आसीत् ?

(3) एकदा सिंहः स्वभार्यया सह कुत्र आगच्छत् ?

(4) मकरः कस्य वधम् अकरोत् ?

(5) कः क्षतिग्रस्तस्य सिंहस्य शुश्रूषाम् अकरोत् ?

**3. Find out the following verbs used in the lesson and transform them as shown in the Illustration :**

**Illustration :** दृश् (पश्य्) – अपश्यत्  वद् – अवदत्

| | |
|---|---|
| गम् (गच्छ्) – ________ | वस् – ________ |
| कृ – ________ | रक्ष् – ________ |
| भू (भव्) – ________ | चल् – ________ |
| पत् – ________ | |

**4. Arrange the following sentences in the proper sequence of the story :**

(1) श्मशानतः एव सः वनम् अगच्छत्।

(2) सः क्षतिग्रस्तस्य सिंहस्य सहायतार्थं तत्र अगच्छत्।

(3) नद्याः तटे मात्रावालः कृषिवाटिका आसीत्।

(4) मात्रावाल सह सर्वत्र भ्रमणम् अकरोत्।

(5) दुःखितः सिंहः नद्याः तटे अतिष्ठत्।

**5. Transform the sentences as shown in the Illustration :**

**Illustration :** सिंहःस्वभार्यया सह नद्याः जलपानार्थं गच्छति।

सिंहः स्वभार्यया सह नद्याः जलपानार्थम् अगच्छत्।

(1) मकरः सिंहभार्यायाः वधं करोति।

(2) सिंहः निष्फलःभवति।

(3) सिंहः गृहं क्षेत्रं च रक्षति।

(4) मननः पोरबन्दरनगरे वसति।

(5) बालः चलचित्रं पश्यति।

**6. Fill in the blanks :**

(1) कृषीवलः वृक्षतले स्थित्वा नद्याः जलम् अपश्यत्। (स्था)

(2) शिष्यः शालां ____________ अभ्यासम् अकरोत्। (गम्)

(3) भक्तः कथां ____________ भोजनम् अकरोत्। (श्रु)

(4) भिक्षुकाय भोजनं ____________ सः अखादत्। (दा)

(5) श्यामः दुग्धं ____________ शयनम् अकरोत्। (पिब्)

(6) गृहकार्यं ____________ क्रीडार्थम् अगच्छत् (कृ)

7. Listen to the paragraph dictated by your teacher and write it in the note-book. Get it checked with the help of your friends, teacher or the text-book and correct them.

8. Draw a picture of a jungle in your note-book with proper colours.

## Activity

- Read the story silently.
- If there is any real event likes this in your area of the friendship between man animal, present it in Sanskrit with the help of your teacher; for example....
  - friendship of a puppy and a child
  - an old woman and a cat
  - the cow and your mother
- Find out the story of love between man and animal from the library and present it in the prayer assembly.

# पुनरावर्तनम् 2

## 1. Chant the following shlokas :

शुकवद् भाषणं कुर्याद्
बकवद् ध्यानमाचरेत्।
अजवच्चर्वणं कुर्याद्
गजवत् स्नानमाचरेत्॥ १ ॥

षड्दोषाः पुरुषेण इह
हातव्याः भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोधः
आलस्यं दीर्घसूत्रता॥ २ ॥

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता॥ ३ ॥

वेशेन वपुषा वाचा विद्यया विनयेन च।
वकारैः पञ्चभिर्युक्तो नरो भवति पूजितः॥ ४॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वायवो वान्ति सर्वं सत्ये प्रतिष्ठितम्॥ ५ ॥

### Glossary

**चर्वणम्** chew **हातव्याः** should leave **भूतिमिच्छता** the one who desires supremacy/greatness/divinity **दीर्घसूत्रता** work slowly **वेशेन** with costume **वपुषा** with the body **वाचा** with speech **पञ्चभिः** with all five **धार्यते** bears

## 2. Disjoin the Sandhi/Conjunct :

- पुनश्चन्दनम्
- सहायतार्थम्
- स्वयमेव
- कतिदिनानन्तरम्

## 3. Translate the following sentences into Sanskrit :

(1) Amreli is in Saurashtra.

(2) They themselves don't use clothes.

(3) My village is big.

(4) There is a library here.

## 4. Follow the example and rewrite the following sentences with proper changes :

**Illustration :** सज्जनः शालाम् अरक्षत्।
सज्जनः शालां रक्षति

(1) मात्रावालः सिंहम् अपश्यत्। ____________________

(2) चाणक्यः प्रकोष्ठम् अविशत्। ____________________

(3) क्रीडकः कन्दुकम् अक्षिपत्। ____________________

(4) वृक्षात् पर्णम् अपतत्। ____________________

(5) सिंहः श्मशानम् अगच्छत्। ____________________

## 5. Fill in the blanks selecting the proper option from the brackets :

(1) सिंहः स्वभार्यया ____________ नदीम् अगच्छत्। (सह, तत्र, च)

(2) मनोजः पठति। समीरः ____________ पठति। (सह, अपि, यत्र)

(3) यत्र पुस्तकम् अस्ति। ____________ लेखनी अपि अस्ति। (सह, अपि, तत्र)

(4) रक्षकः गृहं क्षेत्रं ____________ रक्षति। (तत्र, च, अपि)

## 6. Fill in the following blanks :

(1) सा स्नानं ____________ पूजाम् अकरोत्। (कर्तुम् / कृत्वा )

(2) धरमः पुस्तकालयात् पुस्तकं ____________ पठनं करोति। (नीत्वा / नेतुम् )

(3) अहं वर्गखण्डात् बहिः ____________ इच्छामि (गत्वा / गन्तुम्)

(4) लोकसम्पतिः सदा ____________। (रक्षणीया / रक्षित्वा)

(5) गजेन्द्रः मोदकं ____________ शयनं करोति। (खादितुम् / खादित्वा)

# भाषासज्जता

It is necessary to develop language competency and for that it is also necessary to know some teachniques of language teaching. We shall try to extend our competencies studying some points.

**Participle :**

The participles are formed by adding suffixes to the root verb. Let us understand some of the essential participles and their uses in the language.

**Relative Past Participle ( संबंधक भूतकृदंत ) :**

Read the sentences :

(1) सः शालां गत्वा अभ्यासं करोति।

(2) सा पुस्तकालयं गत्वा पुस्तकम् आनयति।

(3) शिक्षिका पुस्तकं पठित्वा कथां कथयति।

Look at the above three sentences. In the first sentence सः शालां गत्वा (after going) अभ्यासं करोति। The action of going precedes the action of study. The first completed action has been connected with second one or the relation is created. 'त्वा' suffix is used for that. Similarly, we can understand गत्वा (after going) in the second sentence and पठित्वा (after reading) in the third one. Try to understand the following commonly used sentences in real life :

(1) Mother : 'Sit after going there....'

**(1) 'माता वदति, 'तत्र गत्वा उपविशतु..।'**

(2) He went out after writing the letter.

**(2) सः पत्रं लिखित्वा बहिः अगच्छत्।**

(3) She came to the village after being winner.

**(3) सा विजयिनी भूत्वा ग्रामम् आगच्छत्।**

Now add 'त्वा' suffix to the following :

| | | |
|---|---|---|
| नम् – नत्वा | नी – नीत्वा | गण् – गणयित्वा |
| गम् – ________ | जि – ________ | रच् – ________ |
| मन् – ________ | श्रु – श्रुत्वा | दा – दत्वा |
| कृ – ________ | दृश् – दृष्ट्वा | |

But, when the 'Upsarga' is added before the root verb, 'य' suffix is added instead of 'त्वा'; For example,

गम् – गत्वा but आ+गम् – आगम्य

नी – नीत्वा but आ+नी – आनीय

**Now translate the following sentences into Sanskrit :**

(1) Krushnaprasad talks after going to office.

(2) Radhika is happy after listening to the song.

(3) I take milk after taking bath.

हेत्वर्थ कृदन्त :

In actual communication, we need to use, 'I want to do this...' frequently.

(1) I want to go. - अहं गन्तुम् इच्छामि।

(2) She wants to play. - सा क्रीडितुम् इच्छति।

(3) He cannot see. - सः द्रष्टुम् न शक्नोति।

You can see the use of गन्तुम्, रन्तुम्, द्रष्टुम् in the sentences. Something has been expressed very easily. Such use of words is called. The suffix तुम् is added to the root verb in.... Let us try to make forms of .....

हेत्वर्थ कृदन्त।

| | | |
|---|---|---|
| गम् – गन्तुम् | रम् – रन्तुम् | नी – नेतुम् |
| पा – पातुम् | पठ् – पठितुम् | रच् – रचयितुम् |
| क्रीड् – ________ | चल् – ________ | कथ् – ________ |
| खाद् – ________ | गा – ________ | दा – ________ |

**Translate the following sentences into Sanskrit :**

(1) He wants to take examination.

(2) He wants to drink water.

(3) I want to read a book.

**Activity**

Find out the forms of हेत्वर्थ कृदन्त used in the text-book of the second semester and discuss them in the class-room.

**विध्यर्थ कृदन्त :**

Read the sentences and understand them.

(1) Mother is respected. - माता सदा वन्दनीया।

(2) Truth should always be practised. - सत्यम् सदा आचरणीयम्।

(3) We should remember by heart. - मनसा सततं स्मरणीयम्।

Here we have used the words वन्दनीया, आचरणीयम्, स्मरणीयम्. We use these words in real life communication. They are called विध्यर्थ कृदन्त While using it, there would be changes of gender according to noun for which it is used. For example...

वन्दनीयः पुरुषः, वन्दनीया सन्नारी, वन्दनीयं तीर्थम्।

**ह्यस्तन भूतकाल :**

We should acquire the skill of presenting the details of past in real communication. Every language has its own way of past presentation. In Sanskrit, there are three types of past tense, अद्यतन भूतकाल, ह्यस्तन भूतकाल and परोक्ष भूतकाल Here we shall learn the ह्यस्तन भूतकाल। They is frequently used in real communication.

(1) एकदा सः द्रोणाचार्यस्य समीपम् अगच्छत् अवदत् च।

(2) शनैः सः कुशलः धनुर्धरः अभवत्।

The above sentences are taken from the lesson आत्मश्रद्धायाः बलम् (1st semester). There are the forms of ह्यस्तन भूतकाल आगच्छत्, अवदत्, अभवत् etc.

- It is used to mention the action completed in the nearest path.
- 'अ' prefix is used in ह्यस्तन भूतकाल।
- Thus the ह्यस्तन भूतकाल is formed अ + धातु + विकरण प्रत्यय + Parasmaipadi/Atmanapedi inflaction.

**For example :** अ + गच्छ् + अ + त् = अगच्छत्

अ + भव् + अ + त् = अभवत्

अ + वद + अ + त् = अवदत्

**अव्यय :**

Noun, pronoun, verb, adjective etc. are the parts of speech. 'अव्यय' is one of them The word which is not changed due to gender, number or case, is called 'अव्यय'. Generally it is used to present emphatically.

**Let's understand the use of अव्यय in the following sentences.**

(1) यदा . . . तदा

यदा काकः आहारार्थं गच्छति तदा सर्पः एकं शावकं खादति।

(2) यदि . . . तर्हि

यदि धनं दास्यसि तर्हि सः गमिष्यति।

(3) यथा . . . तथा

यथा राजा तथा प्रजा।

(4) अत्र . . . तत्र

अत्र अनेकानि चित्राणि सन्ति। तत्र वितरण व्यवस्था अस्ति।

(5) अपि

गुरुदेव अहम् अपि तव शिष्यं भवितुम् इच्छामि।

(6) अन्यथा

नय माम्, अन्यथा अहं त्वां खादिष्यामि।

(7) अधुना

अधुना वयम् सुखेन वसामः।

(8) अद्य

अद्य सोमवासरः।

(9) वा (or)

नदीजलेन कूपजलेन वा वृक्षस्य सेचनं भवति।

(10) सर्वदा

अहं सर्वदा सत्यं वदामि।

(11) अन्यत्र

जलस्य अभावे जनाः अन्यत्र गच्छन्ति।

(12) एव

सन्तोषः एव पुरुषस्य परं निधानम्।

(13) उच्चैः

विप्राः उच्चैः मन्त्रगानं कुर्वन्ति।

(14) नीचैः

मम भगिनी नीचैः भाषते।

संस्कृत 8




**Production**

Gujarat Council of Educational Research and Training
Gandhinagar

**Printing**

Gujarat State Branch Text-book Board
Gandhinagar


संस्कृत 8

# Sanskrit

## Standard 8

### (Semester II)






# कविकुलगुरूः महाकविः कालिदासः



संस्कृतसाहित्यक्षेत्रे कालिदासः महाकविरूपेण ख्यातः तथापि तस्य जीवनविषये अज्ञानता एव प्रवर्तते। किंवदन्ती अनुसारेण सः धारानगरे भोजराजस्य सभायाः कविरत्नः आसीत्।

कालिदास रचित कृतयः

| | | |
|---|---|---|
| महाकाव्यम् | – | रघुवंशम्, कुमारसंभवम् |
| ऋतुकाव्यम् | – | ऋतुसंहारम् |
| खण्डकाव्यम् | – | मेघदूतम् |
| नाट्यसाहित्यम् | – | अभिज्ञानशाकुन्तलम् |
| | | मालविकाग्निमित्रम् |
| | | विक्रमोर्वशीयम् |

## भाषाक्रीडा 1

**Note :** Frame sentences by selecting the subject from the smaller circle and proper verb from the bigger circle.

**Example :** त्वं पठसि।




## भाषाक्रीडा 2

**Note :** Shyam is the subject in the following table. Frame sentences by using proper verbs and objects.

**Example :** श्यामः धंन ददाति

